श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु यादवाभ्युदये महाकाव्ये

# ॥ षष्ठः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ षष्ठः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

शमयता पुरुहूतमहोत्सवं व्रजपतिः सह वल्लवयूथपैः।
निभृतमञ्जुगिरा निजसूनुना निजगदे जगदेककुटुम्बिना॥ **6.1** ॥

विदितवानिव विज्ञपयाम्यहं शृणुत मे शकुनेरिव भाषितम्।
पृथुकबुद्धिरहं पृथुचेतसः प्रभवतो भवतो नहि शिक्षये॥ **6.2** ॥

निगमदृष्टमिदं निखिलेन वः क्वचन विश्वतनौ पुरुषे स्थिते।
य इह यामुपजीवति तत्तनुं स हि तया हितया भुवि नाथवान्॥ **6.3** ॥

अतियजेत निजां यदि देवतां उभयतश्च्यवते जुषतेऽप्यघम्।
क्षितिभृतैव सदैवतका वयं वनवताऽनवता किमहिद्रुहा॥ **6.4** ॥

अनघशाद्वलकाननसम्पदा नदनदीह्रदनिर्झरशालिना।
बहुपशुः पशुपालकसंततिः महिभृता हि भृता न मरुत्वता॥ **6.5** ॥

अचलमर्चत किं विबुधैश्चलैः शुभवनं भवनं च दिवौकसाम्।
क्षममनेन वने परिरक्षिते न हरिणा हरिणानपि बाधितुम्॥ **6.6** ॥

गिरिषु विष्णुविभूतिषु युज्यते निखिलदेवमयीषु च गोषु नः।
तदुभयाश्रितवृत्त्युपजीविनां गुरु चिरं रुचिरं च समर्चनम्॥ **6.7** ॥

अभिमतं गिरयः कृतसत्क्रिया ददति दर्शितदैवतभूमिकाः।
हरितरक्षुमुखैरपि विग्रहैः अहितमाहितमानविपर्ययाः॥ **6.8** ॥

पशुभिरद्रिचरैरुपकल्पिते व्रजनये जनयेम न विप्लवम्।
क्षितिभृदेष समीहितसिद्धये जनमितं न मितम्पचतां नयेत्॥ **6.9** ॥

अपि च साधु गवामभिवर्धनात् अनृतहानिजया निजयाऽऽख्यया।
भजति गोपगणैरभिराध्यतां वनमयं नमयन् फलसम्पदा॥ **6.10** ॥

हरति तापमसावुपसेदुषां महिमवान् हिमवानिव दक्षिणः।
वितनुते मणिरश्मिभिरप्यसौ सुरपतेरपतेज इवास्पदम्॥ **6.11** ॥

प्रदिशता मधुमूलफलानि नः सतरुणा तरुणाद्भुतवीरुधा।
उपकृतं गिरिणा तदिहार्प्यतां रसततं सततं हविराहृतम्॥ **6.12** ॥

समरुता मरुतापजिताऽमुना नदवता दवतान्तिदवीयसा।
श्रमहता महता कृतविश्रमा वयमितो यमितोल्बणशाक्वराः॥ **6.13** ॥

बहुमतो मनुजा दधते धृतिं बहुमतोऽयमनन्यधृतिः सताम्।
गिरिशतोन्नतिमानधिको ह्यसौ गिरिशतोषकृतोऽपि महीभृतः॥ **6.14** ॥

सनगरा नगराजिमताऽमुना कुहरिणा हरिणा समसम्पदा।
सततमाततमानमहीयसी वसुमती सुमतीश्वर धार्यते॥ **6.15** ॥

सुरसगन्धविभूतिनिधे हितं परिगृहाण निजे पशुपालने।
सुरसगन्धविभूति निधेहि तं हरिमवेत्य गिरिं हविरुत्तमम्॥ **6.16** ॥

विशुद्धतोयौघपरीतपार्श्वे शुद्धाशयाः श्वेत इवान्तरीपे।
निराशिषो नित्यमिहाश्रयन्ते नैः श्रेयसं तात निवृत्तिधर्मम्॥ **6.17** ॥

इहवासमही समहीनगुणे स्थिरकुञ्जगृहे जगृहे विबुधैः।
अयमानमतां न मतां न तनुं क्षितिभृद्व्रजते भज तेन धृतिम्॥ **6.18** ॥

तटभूमिरसौ जयति त्रिदिवं पवनागततापवनागतता।
इह देवगणैरनिशाध्युषिता युतकोकनदायुतकोकनदा॥ **6.19** ॥

प्रकृष्टवंशोदयमाननीयः प्रभूततोयप्रथितानुरूप्याः।
प्रवालमुक्तामणिचित्रिताङ्गीः पत्नीरयं प्रापयते पयोधिम्॥ **6.20** ॥

नन्द नीतिधन सर्वनन्दनी तत्त्व यातमतिभूष तत्त्वया।
साधुना क्षितिभृतो रसाधुना सेव्यतामिह गतेन सेव्यताम्॥ **6.21** ॥

नम्यतेह नियता विभूतये भूतयेश्वरतया विराजते।
राजतेदृशतटीमहीयसे हीयसे न यदि नाम नम्यते॥ **6.22** ॥

अयोगनिद्रस्य हरेरिदानीं मान्ये पदे मानसतः प्रवृत्ताः।
त्वदाशयस्वच्छसरित्प्रवाहे हंसैः समं वासमिहाश्रयेम॥ **6.23** ॥

निशाकरस्य स्फटिकेष्विहाधिकं सुजातरूपा श्रयतो विभा सिता।
रविप्रभा च स्पृशतीव सांध्यतां सुजातरूपाश्रयतो विभासिता॥ **6.24** ॥

न दन्तिनोऽस्मिन् मुदिता नदन्ति नो वनस्थलीलाऽस्त्विह देवनस्थली।
व्रजाधिपाघोन्नतितीव्रजाधिपा प्रभातताम्राश्मगणप्रभातता॥ **6.25** ॥

महीयसी गोपगणाश्रिता मही वनैरुपेता फलपुष्पभावनैः।
रसौघरम्यैरपि निर्झरैरसौ चकास्त्यमुष्मिन् यवसैश्च मेचका॥ **6.26** ॥

सदोन्नताय प्रणमत्यमुष्मै सतां कनिष्ठा प्रथमाङ्कनिष्ठा।
निशामयास्मिन् सरितश्च रत्नप्रभासमानाः प्रतिभासमानाः॥ **6.27** ॥

इह वंशलताविलग्नवालाः प्रियवाला नतकंधराश्चमर्यः।
शबरीकबरीनिरीक्षणेन त्रपमाणा इव निश्चला भवन्ति॥ **6.28** ॥

हरिनीलरुचा लसत्तमिस्रो दिवसेऽपि स्फुरदोषधिप्रदीपः।
निशि चैष तपोधनाङ्गदीप्त्या दिनमोहादविभक्तकोकयुग्मः॥ **6.29** ॥

व्रजवैरवतीषु वल्लवानां वृष सेनासु सदानवासु देवः।
अचलाकृतिराशु नैष गोप्ता वृषसेनासु सदा न वासुदेवः॥ **6.30** ॥

मधुना सविभव सन्तं मदनधनं यं वदन्ति शुभदिवसं तम्।
नियतमिहैव वसन्तं निष्कामधियोऽपि निर्विशन्ति वसन्तम्॥ **6.31** ॥

काननं दधदसौ सदोन्नमत् काञ्चनारककुभं सदृक्षकः।
मन्दरस्य महता स्ववर्ष्मणा कां च नार ककुभं सदृक्षकः॥ **6.32** ॥

अनेहसा हानिरुपैति नेह सा न कंदरस्थस्य दिशत्यकं दरः।
अपास्य तां भीतिमसावुपास्यतां सदा नवा भूमिरियं सदानवा॥ **6.33** ॥

समिन्धतेऽस्मिन्नजहत्समाधिकाः समाधिकातीतधियः स्थिराशया।
स्थिराशयाश्च व्रतिनः सदारसाः सदारसाध्येषु तपस्स्ववस्थिताः॥ **6.34** ॥

वसत्यमुष्मिन् वनदेवताद्भुता विभाति भास्वत्तिलकालिकानना।
विचित्ररत्ना महती च मेखला विभाति भास्वत्तिलकालिकानना॥ **6.35** ॥

तपस्विनामात्मविदां निवासैः समानभूमावसमानभूमा।
इहाटवी काञ्चनकर्णिकारपरागताम्राऽप्यपरागताम्रा॥ **6.36** ॥

सरस्सु जातैः नलिनैः सुजातैः अपां तरङ्गैश्च सुधान्तरङ्गैः।
इहासमेऽतिव्रततौ समेति मरुत्तुषारः श्रमरुत्तुषारः॥ **6.37** ॥

यमभिप्लुतमम्बुधरैरभितः सरसा सरसास रसाऽऽसरसा।
स्थिरधर्म तया गिरिराद्रियते स मया समयासम या समया॥ **6.38** ॥

प्रणम तमिममचलममरम् अहितमहितमहितमहित।
भजनमलघु विफलमिह न सदयसदय सदय सदय॥ **6.39** ॥

रत्नोपसङ्घटितशृङ्गफणासहस्रः
    स्फारोदितस्फटिकरश्मिविशुद्धकायः।
नित्यं वहन्निजबलेन महीमहीनः
    पुष्यत्यसौ मधुरिपोरपि भोगयोगम्॥ **6.40** ॥

मरुद्गणसमाश्रितो मघवरत्ननीलद्युतिः
    विभाति वनमालया विततनित्यतुङ्गाकृतिः।
कनत्यभिगतः श्रिया कनकरश्मिपीताम्बरः
    करोति विधृतिं भुवः कथमसौ न विश्वम्भरः॥ **6.41** ॥

मुहुरवधीरितोऽपि भजतीह युवा गणयन्
    हितमतिभूरितानवसुधे वनितां तरसा।
सपदि विहाय मानमियमृच्छति तं प्रति सा
    हितमतिभूरिता नवसुधेव नितान्तरसा॥ **6.42** ॥

इह मरुतो वहन्ति सुरसिन्धुसगन्धसरि -
    द्विकसित हेमकोकनद सौरभसारभृतः।
मधुकरमौलिदघ्न मददन्तुर दन्तिघटा -
    करटकटाहवाहिघन शीकरशीभरिताः॥ **6.43** ॥

मनःप्रियमिह प्रभो मधुरसादरं सादरं
    विधत्स्व हविरर्पयन्व्रतशुभावनां भावनाम्।
कुरुष्व च गुरुष्वघक्षपणदक्षिणां दक्षिणां
    प्रयच्छति तवेप्सितं प्रणयपर्वतः पर्वतः॥ **6.44** ॥

गिरिभजनोदितप्रियविकासमये समये
    जनितनभः प्रचारजलपत्रिदशैस्त्रिदशैः।
सह यदि नः समेति हरिरप्रतिघप्रतिघः
    प्रतिहतिमेतु दुष्टवधदोहलिना हलिना॥ **6.45** ॥

प्रत्यक्षं गोत्रमासन्नं किमनादृत्य गोधनैः।
अदृश्यो गोत्रभित् कश्चिद्गतः स्वर्गं गवेष्यते॥ **6.46** ॥

अहार्यो विविधैर्भोगैराकर्षन् विबुधानपि।
अपरिच्छिन्नमूलोऽसौ ससारः सर्वदुःखकृत्॥ **6.47** ॥

नन्द गोपप्रभो धर्मैर्व्रज वृद्धार्य सद्गतिम्।
भज तामेव बुद्ध्वाऽद्रिं तनु त्राणे रतिं गवाम्॥ **6.48**॥

नानाफलवनालीके नालीकेद्धामितोदके।
तोदके च क्षुधामत्र धाम त्रस्तहितं विदुः॥ **6.49**॥

सहसा सह सार्धैर्मा तरसेतरसेवनम्।
तनु तात नुताद्धज्री न गतो न गतोऽर्च्यताम्॥ **6.50**॥

जुषतामिह धीः सूर्यसमा हि तव सुन्दरीम्।
रक्षार्थमिह यक्षेण समाहितवसुं दरीम्॥ **6.51**॥

सभाजनं वदाम्येतद्द्रव्यैः सरसभाजनम्।
सभाजनं गिरेरर्थ्यं स्ववृत्त्युल्लासभाजनम्॥ **6.52**॥

भवता भवतापघ्ने भाविते भावितेजसा।
सुतरा सुतरामस्मिन् सुरभीः सुरभीश्वर॥ **6.53**॥

बहूविद्भ्यः समग्राहि समग्रा हि मतिस्त्वया।
अतोऽन्यजनसंदिग्धे न संदिग्धे हिताहिते॥ **6.54**॥

गोवर्धनप्रकाशिन्या गोवर्धनसमाख्यया।
समक्षेऽपि गिरेरस्य समक्षेपि क्षमा स्तुतिः॥ **6.55**॥

वयं धेनुशतैः सार्धमत्रासङ्कटकान्वयाः।
अन्वभूम निराबाधमत्रासं कटकान्वयाः॥ **6.56**॥

अनन्तमहिमा सोऽयं समस्तवसुधाधरः।
मौलिमण्डनमस्येन्दुः समस्तव सुधाधरः॥ **6.57**॥

तपोधनैरयं शैलो महाभाग महीयते।
गोधनैरपि न त्वत्र महाभागम हीयते॥ **6.58**॥

रोधोरोधोज्झितैरेतैरुत्सैरुत्सैकतैरसौ।
महीमहीनां तनुते ग्रावाग्रावाप्ततारकः॥ **6.59** ॥

धिषणातीत धिषणा लोकनीत्याऽस्तु लोकनी।
सुधरेऽस्मिन्वसुधरे तात तेजस्वितातते॥ **6.60** ॥

पादपादभ्रपर्यन्ता दीनादीनामसौ गतिः।
गोप गोपनयोग्याऽस्मिन् कान्ता कान्तारभूरपि॥ **6.61** ॥

इह पुष्पौघनिष्पन्नव्रजामोदे वने हिते।
भृशमुत्सवसंतोषं व्रजामो देवनेहिते॥ **6.62** ॥

प्रयतस्व गिरेरस्य व्रजदेव सभाजने।
खपुष्पकल्पे मा भक्तिं व्रज देवसभाजने॥ **6.63** ॥

देवस्थानमिवेन्धानं परायणमवारितम्।
गोवर्धनमवेह्येनं नारायणमिवागतम्॥ **6.64** ॥

मोघाशो मघवान्देवः स्यादत्रत्यस्य सादने।
मेघानामपि वा भावः सादमेत्यद्रिसादने॥ **6.65** ॥

अचञ्चलाङ्गसत्ताकश्चलाचलघनाततः।
अचलः कस्य नाकल्यः साध्यानन्दस्य सिद्धिकृत्॥ **6.66** ॥

अगः सनग आसन्नः सालताललताततः।
सततं संहतघनः सङ्गतानन्दसाधकः॥ **6.67** ॥

अहहाङ्ग खगङ्गाकगाहकाङ्गाङ्कगागकः।
अघाकागाङ्ककागाङ्कगाङ्कागखगाङ्ककः॥ **6.68** ॥

रजतगैरिकरत्नगणैरयं कनति कान्तलताञ्चितकाननः।
त्रिजगदेकनिधानतयाधिकः त्रिदशराजधराधरतल्लजात्॥ **6.69** ॥

सहेत पर्वतोऽयं वो गोप्तुं क्वचन कन्दरे।
अदरिद्रा वसामोऽत्र सर्वहेतोरिवोदरे॥ **6.70** ॥

घनाघना घनाघनाद्भुतेह शाखिसंततिः।
वनावनावनावनानुरूपसत्फलावृता॥ **6.71** ॥

वृतेह भाति हेमभूर्नमेरुणा समन्ततः।
प्रतीहि नैनमद्भुतं न मेरुणा समं ततः॥ **6.72** ॥

इह प्रभूतवाहिनीवने वने वने वने।
फलेन भूयते स्वयं नतेन तेन तेन ते॥ **6.73** ॥

अहार्यमेतिचेतनासितासितानराज ते।
अहार्यमेति चेतना सितासिता न राजते॥ **6.74** ॥

समग्रगुणभूमाऽसौ सानुमानागमानितः।
समाहितधियां सेव्यः सानुमानागमानितः॥ **6.75** ॥

याचले जरसानेता ताने सारजले चया।
कालिमानवसायामा माया सा वनमालिका॥ **6.76** ॥

एकक्रियान्वितश्लोकावृत्तिः

अभ्रान्तमतिशय्येह विराजितततमागमे।
निशामयालीनघनं सालौघमतिनन्दनम्॥ **6.77** ॥

अभ्रान्तमति शय्येहविराजि ततमागमे।
निशामयालीनघनं सालौघमतिनन्दनम्॥ **6.77** ॥

चारुचीरीरुचा रोची रुरुचारैरचर्चरुः।
चिरोच्चरोचिरचरो रुचिरो रुचिराचरः॥ **6.78** ॥

नीतिनेत्र नतानन्त नितान्तोन्नततानतः।
तातेतोऽतनुतोऽनीतं न नुत्तैनोनुतान्ततः॥ 6.79॥

सरासससारसासारैः सूरोस्रसरुसारसैः।
रससूः सरसस्रंसैः सरःसाररसैरसौ॥ 6.80॥

धीर धीरधुराधारी धाराधरधरोऽधरे।
रोधोधरारोधरोधिधाराधारो धराधरः॥ 6.81॥

भूभृन्निभेभभानेनानेन भूनाभिनेनभ।
भानुभानुभभाभिन्नं नुन्नं नूनं न नो नभः॥ 6.82॥

तत्र तत्रातितारेऽत्र ताराततीततरूत्तरे।
तरेत्तातारतीरेतातते त्रातरि ते रतिः॥ 6.83॥

विततीतावृतिवृते वीतातीतावृतावृतौ।
तातावातातिवृत्तेऽति वातोऽतीवाततेऽवति॥ 6.84॥

नुन्नैनसां निनंसूनां सानूनासनसानुना।
सानसां नः ससेनानां सानेनासन्नसूः सनिः॥ 6.85॥

कल्लोलोल्लोलकीलाले केकाकलकलाकुले।
कालिकाकलिलालोके काले काले किलैककुः॥ 6.86॥

पतता पततोपेतः पतितोत्पतितातपः।
पाता पीतोपतापोऽपि तपः पूतपते पितः॥ 6.87॥

भूतभूते भूतभृतो भीतताभीतिभूतिभूः।
भातीतो भूभृतो भाभृद्धाता भाता तु भूतितः॥ 6.88॥

मरुमुर्मुरमर्मारिं मारमारेऽमरामरे।
रमारामे मुरारौ रुरामेममुरुमेरुमम्॥ 6.89॥

रवीरेरावरावारोऽवर वैरिविरावर।
विवराराविविवरो वीर वव्रे वरैरुरुः॥ **6.90** ॥

मानयानन्यनियमो मान्यमेनमनामयः।
यमिनां नाम नम्योऽयममेयो मौनमानिनाम्॥ **6.91** ॥

निःसमानेन मानेन सुमनोमानसैः समः।
सोमसीमासमासन्नसानुमान्सानुमानसौ॥ **6.92** ॥

तातेतातीतितातीतः केकाकाकुककेकिकः।
पापोपपापपापापो नानानानान्ननान्ननीः॥ **6.93** ॥

ययेया याय यो योऽयः स सोऽसौ सास सासुसूः।
मम मामोऽममामाम गोगागोगागगोगगुः॥ **6.94** ॥

रुरुरूरुरिरारोऽरं दूदादीं दददादिदः।
लालिलोलालिलीलालो हाहाहूहूहहेह हि॥ **6.95** ॥

नानानानानानानानाना नाना नाना ना नाना।
ना नानानाना ना नानानानाना ना नानानाना॥ **6.96** ॥

इति तत्त्वमतत्त्वं च यथावदवगाढया।
अर्च्यानर्च्यौ धिया भिन्दन्गोधनान्यव गाढया॥ **6.97** ॥

नयानयानयानयानयानयानयानया।
नयानयानयानयानयानयानयानया॥ **6.98** ॥

यानयानयानयान यानयानयानयान।
या नयानयानया न यानयानया न या न॥ **6.98** ॥

मायाभासा साभायामा या सूताया यातासूया।
भातायायायायाताभा सा यायागे गेयायासा॥ **6.99** ॥

सेवा माननमावासे वासिताहिहितासिवा।
माता पिता तापितामा नहितातातता हि न॥ **6.100** ॥

गेहा देववदेहागे हासताननतासहा।
देतानयायानतादेऽव नयात तयानव॥ **6.101** ॥

नदीसारसमेतात्र दीप्ता भासा नरावृता।
साभानासौ माभिरामे रसा सौम्या सुमानस॥ **6.102** ॥

वसुदा त्रसदानन्द धीसुदान्त मुदा नता।
तानदा मुक्तिदा रम्या सनदाऽत्र सदा रसा॥ **6.103** ॥

सद्दैवेऽङ्कुरयातवैभवलताशोभ्युच्चनानागमे
    भव्यं कर्म सदार्चितोद्धव नदीयादःसनाथीकृते।
चित्राटव्यनुवाहिवातवलनश्रेयः प्रचेयोत्सवे
    वेदोक्त्या समये भजेः शुचि गिरौ मेरून्नतेऽस्मिन्ध्रुवे॥ **6.104** ॥

वासे नास्मिन्पूजादेवा वादे जातातोद्यारावा।
वाराद्याविर्भूताजीवा वाजीतात्रादीना सेवा॥ **6.105** ॥

सानुमानयमतीततारकः सानुमानयमतीततारकः।
सानुमानयमतीततारकः सानुमानयमतीततारकः॥ **6.106** ॥

विराजमानादसमान भूमाविराजमानादसमानभूमा।
विराजमानादसमानभूमा विराजमानादस मानभूमा॥ **6.107** ॥

अक्लिष्टचित्रमिदमत्र मनागिवोक्तं
    चित्रायुतानि सुवचानि पुनस्तथापि।
कृत्यं विभोर्निगमनीयमनन्यभक्तैः
    आराध्यतां हरिरसौ पृथिवीधरात्मा॥ **6.108** ॥

इति कथयति कृष्णे गोपवृद्धा विदध्युः
    शरणमशरणानां शाद्वलश्यामलाङ्गम्।
पुलकितवनमालं पुष्पकिञ्जल्कजालैः
    पुरुषमचलशृङ्गे पुण्डरीकायताक्षम्॥ **6.109** ॥

शतमखमणिशैलः स्यादसौ देवतात्मा
    शरदि समुदितं वा तोयकालस्य तोकम्।
चिरपरिचितपूर्वं चेतसां किं न भाग्यं
    न किमिदमिति चिन्तां न व्यतीयाय नन्दः॥ **6.110** ॥

आद्यं किमेतदधिदैवतमद्भुतानां
    आकालिकं फलमुतैकमिदं शुभानाम्।
एकीभवन्निधिरसौ किमभीप्सितानां
    इत्यन्वभावि सविधोपगतैः स देवः॥ **6.111** ॥

पीतांशुके पृथुलबाहुभुजान्तराले
    मेघाभिजन्मनि मिथः प्रतिबिम्बबुद्ध्या।
धन्यानि गोपनयनानि तदाऽन्वभूवन्
    कृष्णे च तत्र च कियन्ति गतागतानि॥ **6.112** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये षष्ठः सर्गः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥